**Mahābhārata III.282**
२८२

मार्कण्डेय उवाच

एतस्मिन्नेव काले तु द्युमत्सेनो महावने ।

लब्धचक्षुः प्रसन्नात्मा दृष्ट्या सर्वं ददर्श ह ।।१।।

स सर्वानाश्रमान्गत्वा शैब्यया सह भार्यया ।

पुत्रहेतोः परामार्तिं जगाम मनुजर्षभ ।।२।।

तावाश्रमान्नदीश्चैव वनानि च सरांसि च ।

तांस्तान्देशान्विचिन्वन्तौ दम्पती परिजग्मतुः ।।३।।

श्रुत्वा शब्दं तु यत्किंचिदुन्मुखौ सुतशङ्कया ।

सावित्रीसहितोऽभ्येति सत्यवानित्यधावताम् ।।४।।

भिन्नैश्च परुषैः पादैः सव्रणैः शोणितौक्षितैः ।

कुशकण्टकविद्धाङ्गावुन्मत्ताविव धावतः ।।५।।

ततोऽभिसृत्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।

परिवार्य समाश्वास्य समानीतौ स्वमाश्रमम् ।।६।।

तत्र भार्यासहायः स वृतो वृद्धैर्तपोधनैः ।

आश्वासितो विचित्रार्थैः पूर्वराज्ञां कथाश्रयैः ।।७।।

ततस्तौ पुनराश्वस्तौ वृद्धौ पुत्रदिदृक्षया ।

बाल्ये वृत्तानि पुत्रस्य स्मरन्तौ भृशदुःखितौ ।।८।।

पुनरुक्त्वा च करुणां वाचं तौ शोककर्शितौ ।

हा पुत्र हा साध्वि वधूः क्वासि क्वासीत्यरोदताम् ।।९।।

सुवर्चा उवाच

यथास्य भार्या सावित्री तपसा च दमेन च ।

आचारेण च संयुक्ता तथा जीवति सत्यवान् ।।१०।।

गौतम उवाच

वेदाः साङ्गा मयाधीतास्तपो मे सञ्चितं महत् ।

कौमारं ब्रह्मचर्यं मे गुरवोऽग्निश्च तोषिताः ।।११।।

समाहितेन चीर्णानि सर्वाण्येव व्रतानि मे ।

वायुभक्षोपवासश्च कुशलानि च यानि मे ।।१२।।

अनेन तपसा वेद्मि सर्वं परिचिकीर्षितम् ।

सत्यमेतन्निबोध त्वं ध्रियते सत्यवानिति ।।१३।।

शिष्य उवाच

उपाध्यायस्य मे वक्त्राद्यथा वाक्यं विनिःसृतम् ।

नैतज्जातु भवेन्मिथ्या तथा जीवति सत्यवान् ।।१४।।

ऋषय ऊचुः

यथास्य भार्या सावित्री सर्वैरेव सुलक्षणैः ।

अवैधव्यकरैर्युक्ता तथा जीवति सत्यवान् ।।१५।।

भारद्वाज उवाच

यथास्य भार्या सावित्री तपसा च दमेन च ।

आचारेण च संयुक्ता तथा जीवति सत्यवान् ।।१६।।

दाल्भ्य उवाच

यथादृष्टिः प्रवृत्ता ते सावित्र्याश्च यथा व्रतम् ।
गताहारमकृत्वा च तथा जीवति सत्यवान् ॥१७॥

मान्दव्य उवाच

यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः ।
पार्थिवी च प्रवृत्तिस्ते तथा जीवति सत्यवान् ॥१८॥

धौम्य उवाच

सर्वैर्गुणैरुपेतस्ते यथा पुत्रो जनप्रियः ।
दीर्घायुर्लक्षणोपेतस्तथा जीवति सत्यवान् ॥१९॥

मार्कण्डेय उवाच

एवमाश्वासितस्तैस्तु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान्विगणयन्नर्थानवस्थित इवाभवत् ॥२०॥
ततो मुहूर्तात्सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥२१॥

ब्राह्मना ऊचुः

पुत्रेण संगतं त्वाद्य चक्षुर्मन्तं निरीक्ष्य च ।
सर्वे वयं वै पृच्छामो वृद्धिं ते पृथिवीपते ॥२२॥
समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश्चात्मनो लाभात्त्रिभिर्दिष्ट्या विवर्धसे ॥२३॥
सर्वैरस्माभिरुक्तं यत्तथा तन्नात्र संशयः ।
भूयो भूयश्च वृद्धिस्ते क्षिप्रमेव भविष्यति ॥२४॥

मार्कण्डेय उवाच

ततोऽग्निं तत्र संज्वाल्य द्विजास्ते सर्व एव हि ।
उपासांचक्रिरे पार्थ द्युमत्सेनं महीपतिम् ॥२५॥
शैब्या च सत्यवांश्चैव सावित्री चैकतः स्थिताः ।
सर्वैस्तैरभ्यनुज्ञाता विशोकाः समुपाविशन् ॥२६॥
ततो राज्ञा सहासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ पप्रच्छुर्नृपतेः सुतम् ॥२७॥
प्रागेव नागतं कस्मात्सभार्येण त्वया विभो ।
विरात्रे चागतं कस्मात्कोऽनुबन्धश्च तेऽभवत् ॥२८॥
संतापितः पिता माता वयं चैव नृपात्मज ।
नाकस्मादिति जानीमस्तत्सर्वं वक्तुमर्हसि ॥२९॥

सत्यवानुवाच

पित्राहमभ्यनुज्ञातः सावित्रीसहितो गतः ।
अथ मेऽभूच्छिरोदुःखं वने काष्ठानि भिन्दतः ॥३०॥
सुप्तश्चाहं वेदनया चिरमित्युपलक्षये ।
तावत्कालं च न मया सुप्त पूर्वं कदा चन ॥३१॥
सर्वेषामेव भवतां संतापो मा भवेदिति ।
अतो विरात्रागमनं नान्यदस्तीह कारणम् ॥३२॥

गौतम उवाच

अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।

नास्य त्वं कारणं वेत्थ सावित्री वक्तुमर्हति ॥ ३३ ॥
श्रोतुमिच्छामि सावित्रि त्वं हि वेत्थ परावरम् ।
त्वां हि जानामि सावित्रि सावित्रीमिव तेजसा ॥ ३४ ॥
त्वमत्र हेतुं जानीषे तस्मात्सत्यं निरुच्यताम् ।
रहस्यं यदि ते नास्ति किं चिदत्र वदस्व नः ॥ ३५ ॥
सावित्र्युवाच
एवमेतद्यथा वेत्थ सङ्कल्पो नान्यथा हि वः ।
न च किं चिद्रहस्यं मे श्रूयतां तथ्यमत्र यत् ॥ ३६ ॥
मृत्युर्मे भर्तुराख्यातो नारदेन महात्मना ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥ ३७ ॥
सुप्तं चैनं यमः साक्षादुपागच्छत्सकिंकरः ।
स एनमनयद्बद्ध्वा दिशं पितृनिषेविताम् ॥ ३८ ॥
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान्मम ॥ ३९ ॥
चक्षुषी च स्वराज्यं च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं पुत्राणामात्मनः शतम् ॥ ४० ॥
चतुर्वर्ष शतायुर्मे भर्ता लब्धश्च सत्यवान् ।
भर्तुर्हि जीवितार्थं तु मया चीर्णं स्थिरं व्रतम् ॥ ४१ ॥
एतत्सत्यं मयाख्यातं कारणं विस्तरेण वः ।
यथा वृत्तं सुखोदर्कमिदं दुःखं महन्मम ॥ ४२ ॥

ऋषय ऊचुः
निमज्जमानं व्यसनैरभिद्रुतं
कुलं नरेन्द्रस्य तमो मये ह्रदे ।
त्वया सुशीले धृतधर्मपुण्यया
समुद्धृतं साध्वि पुनः कुलीनया ॥ ४३ ॥
मार्कण्डेय उवाच
तथा प्रशस्य ह्यभिपूज्य चैव ते
वरस्त्रियं तामृषयः समागताः ।
नरेन्द्रमामन्त्र्य सपुत्रमञ्जसा
शिवेन जग्मुर्मुदिताः स्वमालयम् ॥ ४४ ॥